DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 1

# WEEK FOUR

# DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Fall Term, Class Schedule

**WEEK FOUR: Thursday, Nov. 2, 2006 1:00 – 4:00 PM**

A. Quiz (open book).
B. Review of homework from Class Three
C. Overview of the Future Systems (Whitney, #931-950)
D. Introduction to Arya Nagarjuna's मूलमध्यमककारिका for the week.

**HOMEWORK FOR WEEK FOUR (a.k.a. "Take Home Final", due via email no later than Nov. 20):**

For each of the verses below from Arya Nagarjuna's मूलमध्यमककारिका, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ). Then, finally, provide your own translation of the verse as a whole.

<u>Hints:</u>

For निर्मिमीते, Whitney #663

कर्म नोत्पद्यते कस्मान् निःस्वभावं यतस्ततः ।

यस्माच्च तदनुत्पन्नं न तस्माद्विप्रणश्यति ॥ २१

कर्म स्वभावतश्चेत्स्याच्छाश्वतं स्यादसंशयं ।

अकृतं च भवेत्कर्म क्रियते न हि शाश्वतं ॥ २२

अकृताभ्यागमभयं स्यात्कर्माकृतकं यदि ।

अब्रह्मचर्यवासश्च दोषस्तत्र प्रसज्यते ॥ २३

व्यवहारा विरुध्यन्ते सर्व एव न संशयः ।

पुण्यपापकृतोर्नैव प्रविभागश्च युज्यते ॥ २४

तद्विपक्वविपाकं च पुनरेव विपक्ष्यति ।

कर्म व्यवस्थितं यस्मात्तस्मात्स्वाभाविकं यदि ॥ २५

कर्म क्लेशात्मकं चेदं ते च क्लेशा न तत्त्वतः।

न चेत्ते तत्त्वतः क्लेशाः कर्म स्यात्तत्त्वतः कथं॥ २६

कर्म क्लेशाश्च देहानां प्रत्ययाः समुदाहृताः।

कर्म क्लेशाश्च ते शून्या यदि देहेषु का कथा॥ २७

अविद्यानिवृतो जन्तुस्तृष्णासंयोजनश्च सः।

स भोक्ता स च न कर्तुरन्यो न च स एव सः॥ २८

न प्रत्ययसमुत्पन्नं नाप्रत्ययसमुत्थितं।

अस्ति यस्मादिदं कर्म तस्मात्कर्तापि नास्त्यतः॥ २९

कर्म चेन्नास्ति कर्ता च कुतः स्यात्कर्मजं फलं।

असत्यथ फले भोक्ता कुत एव भविष्यति ॥३०

यथा निर्मितकं शास्ता निर्मिमीतर्द्धिसंपदा ।

निर्मितो निर्मिमीतान्यं स च निर्मितकः पुनः ॥ ३१

तथा निर्मितकाकारः कर्ता यत्कर्म तत्कृतं ।

तद्यथा निर्मितेनान्यो निर्मितो निर्मितस्तथा ॥ ३२

क्लेशाः कर्माणि देहाश्च कर्तारश्च फलानि च ।

गन्धर्वनगराकारा मरीचिस्वप्नसंनिभाः ॥ ३३